## अष्टमाध्यायस्य

## तृतीयः पादः

### मतुवसो रु सम्बुद्धौ छन्दसि। (१/३६२८)

[1]संहितायाम् इति वर्तते। मत्वन्तस्य वस्वन्तस्य च पदस्य रुः इत्ययमादेशो भवति सम्बुद्धौ परतः छन्दसि विषये। मत्वन्तस्य तावत् – 'इन्द्र मरुत्व इह पाहि सोमम्' (तै.१.४.१८.१)। 'हरिवो मेदिनं त्वा' (तै.४.७.१४.४)। [2]मरुतोऽस्य सन्ति, हरयोऽस्य सन्ति इति मतुप्। [3]सुप्तकारयोः हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (६.१.६८/२५२) संयोगान्तस्य लोपे (८.२.२३/५४) च कृते नकारस्य रुः भवति। वस्वन्तस्य खल्वपि – 'मीढ्वस्तोकाय तनयाय मृळ' (ऋ.२.३३.१४)। इन्द्र साह्वः। क्वसोर्निपातनम् दाश्वान्साह्वान्मीढ्वांश्च (६.१.१२/३६२९) इति। मतुवसोः इति किम्? ब्रह्मन् [4]स्तोष्यामः। सम्बुद्धौ इति किम्? 'य एवं [5]विद्वानग्निमुपतिष्ठते' (मै.१.५.७)। छन्दसि इति किम्? हे गोमन्। हे पपिवन्।

[९३४] वन उपसङ्ख्यानं कर्तव्यम्। (म.भा.३.४२४)

'यस्त्वायन्तं वसुना प्रातरित्वः' (ऋ.१.११५.२)। इणः प्रातःपूर्वस्य छन्दसि क्वनिप्।

[९३५] विभाषा भवद्भगवदघवतामोच्चावस्य। (म.भा.३.४२४)

छन्दसि भाषायां च भवत् भगवत् अघवत् इत्येतेषां विभाषा रुः वक्तव्यः, अवशब्दस्य च ओकारादेशः। सामान्येन छन्दसि भाषायां चेदं वचनम्। भवत् – हे भोः, हे भवन्। भगवत् – हे भगोः, हे भगवन्। अघवत् – हे अघोः, हे अघवन्। [6]निपातनविज्ञानाद् वा सिद्धम्। अथ वा [7]भो इत्येवमादयो निपाता द्रष्टव्याः। असम्बुद्धौ [8]अपि द्विवचनबहुवचनयोरपि दृश्यन्ते। भो देवदत्तयज्ञदत्तौ। भो देवदत्तयज्ञदत्तविष्णुमित्राः। तथा स्त्रियामपि च दृश्यन्ते, भो ब्राह्मणि इत्यादि। संहिताधिकार उत्तरत्र उपयुज्यते, [9]यत्र भिन्नपदस्थौ निमित्तनिमित्तिनौ 'नश्छव्यप्रशान्' (८.३.७/१४०) इति॥

---

1. पदस्य इति वर्तते क. इ. ब. ड. ह. 2. मरुतः – मतुप् नास्ति ड. 3. मतुपि कृते हल्ङ्यादिलोपे क, मतुपि नुमि कृते इ. 4. स्तोष्यामि ड. 5. विद्वान् सो क. 6. निपातविज्ञानात् ड. 7. भो भगो अघो क. ड. 8. इति क. 9. तत्र क.